Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ अथ शूद्रविवाहपद्धतिःप्रारभ्यते ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्रक और प्रकाशक–

गङ्गाविष्णु श्रीकृष्णदास,

मालिक–"लक्ष्मीवेङ्कटेश्वर" स्टीम्–प्रेस, कल्याण–बंबई.

सन् १८९७ के आक्ट २५ के मुजब रजिष्टरी सब हक्क प्रकाशकने अपने आधीन रक्खा है.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणाधिराजाय नमः ॥ श्रीकर्मठाग्र्यपितृव्यज्येष्ठानन्दशर्मणे नमः। अथ सच्छूद्राणां विवाहाख्य संस्कारः । शूद्रस्य शूद्रापरिणयने मन्त्ररहितं क्रियामात्रं कार्यमिति हरिहरभाष्ये उक्तं तेन कार्तीयकर्मोच्यते । तत्रादौ विवाहदिने तत्पूर्वदिने वा कन्यापिता प्रातर्मातृयागपुरःसरं नान्दीश्राद्धं विधाय विवाहोक्ते मुहूर्ते स्नातः शुक्लाम्बरधरो मण्डपे उपविश्याऽऽचम्य देशकालौ संकीर्त्य ममास्याः कन्यायाः जातकर्मादिविवाहान्तपूर्वसंस्कारलोपजन्यप्रत्यवायपरिहारार्थं प्रतिसंस्कारं रजतद्रव्यममुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे । स्वस्तीति प्रतिवचनम्। एवं पूर्वसंस्कारलोपनिमित्तं दक्षिणां दत्त्वा पुनर्देशकालौ संकीर्त्य काश्यपगोत्रोऽमुकदासोऽहं ममास्याः कन्याया भर्त्रा सह धर्मप्रजोत्पादेनगृह्यपरिग्रहणधर्माचरणेष्वधिकारसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं विवाहाख्यं संस्कारकर्म करिष्ये। तदङ्गतया गणेशपूजास्वस्तिवाचननवग्रहपूजनादिकर्म करिष्ये इति संकल्प्य गणेशं पूजयेत् । तत्रादौ ध्यानम् । शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ १ ॥ अभीप्सितार्थसिद्ध्यर्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूजितो यः सुरासुरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ २ ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ ३ ॥ धूम्रकेतुर्गणाध्यक्षो भाल चन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ ४ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥ ५ ॥ स्वस्ति श्रीमहागणा धिपयते नमः ॥ अथातः सम्प्रवक्ष्यामि गणयोगं सुखावहम् । कामके वासके यज्ञे विवाहे व्रतसंयमे ॥ १ ॥ आदौ गणेशं संपूज्य सर्वकामफलप्रदम् । माससमासाधिपं देवं गाण पत्यं लभेन्नरः ॥ २ ॥ येनासौ पूजितो यज्ञे मासाचार्यः प्रपूजितः । कोऽसौ मासपतिर्देवो ह्यत्र धूपेन धूपितः ॥ ३ ॥ ज्येष्ठमासे कृतं पूज्य यज्ञकाले सनातनम् । मंडलं प्रथमं पूज्य कोष्ठद्वादशमुत्तमम् ॥ ४ ॥ सिन्दूरेणार्चितो देव ईशान्यां तु विनायकः । ग्रहयुक्तं ततः स्थाप्य मासे मासेऽधिकं फलम् ॥ ५ ॥ गणाधिपं मार्गशीर्षे तथा पौषे विनायकम् । गजवक्त्रं च माघे च भालचन्द्रं च फाल्गुने ॥ ६ ॥ चैत्रमासे तु वेदाङ्गं वैशाखे शिवसूनुकम् । ज्येष्ठे शिवसुतं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूज्य आषाढे हरनन्दनम् ॥ ७ ॥ श्रावणे तापसं देवं भाद्रे मोदकभक्षकम् । आश्विने च महा
वीर्यं महावीर्यं च कार्तिके ॥ ८ ॥ विघ्नहर्तारमधिके मासि पूज्य गणेश्वरम् । गन्धपुष्पैस्तथा
धूपैः कर्पूरैर्यक्षकर्दमैः ॥ ९ ॥ मृगमदैः कुङ्कुमैश्च सिन्दूरेण विशेषतः । रक्तोत्पलदलैः पूज्य
बिल्वपत्रेण केशरैः ॥ १० ॥ मालतीकेतकीपुष्पैर्हेमपुष्पैर्विचक्षणः । अर्घ्यं धूपं च दीपं
च रक्तवस्त्रेण छादनम् ॥ ११ ॥ पूजायां कुरुते देवे दद्यान्मोदकभोजनम् । नमो देव
गणेशाय नमस्ते विघ्ननाशन ॥ १२ ॥ नमस्ते मूषकारूढ शुभाकाराय वै नमः । नमः कात्या
यनीपुत्र लम्बकर्णाय वै नमः ॥ १३ ॥ गजदन्त विरूपात्मन् विद्याबुद्धिविचक्षण । देहि मे
पुत्रसौभाग्यं देहि मे सुखसंपदम् ॥ १४ ॥ इच्छासमधिपं देवं वरं विनायकेश्वरम् । शत्रूणां
दुष्टा ये केचिद्दुर्जनारीचकर्षिले ॥ १५ ॥ तेषां दंडहितार्थाय प्रार्थये तु गणेश्वरम् । पूर्वं
पूजा गणेशस्य शान्तिश्चैव विशेषतः ॥ १६ ॥ नाशयेत्सर्वदुष्टानि कल्याणं च भवेत्सदा ।
कृष्णेन भाषितं पूर्वं देवता परिकीर्तिता ॥ १७ ॥ मंडलं यत्र यज्ञे च भोक्ता तत्र विनायकः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गणयागविहीनस्य निष्फलं तस्य जायते ॥ १८ ॥ हरते सर्वविघ्नानि त्वत्प्रसादो विनायक ॥ १९ ॥ इति पठित्वा हस्ते पुष्पाण्यादाय । हे हेरम्ब त्वमेह्येहि अम्बिकाऽयम्बकात्मज । सिद्धिबुद्धियुत ऽयक्ष सर्वलोकपितः पितः ॥ १ ॥ नागास्य नागहार त्वं गणनाथ चतुर्भुज । भूषितः स्वायुधैर्दिव्यैः पाशाङ्कुशपरश्वधैः ॥ २ ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः । इहागत्य गृहाण त्वं पूजां रक्ष च मे क्रतुम् ॥ ३ ॥ श्रीगणेश इहागच्छ इह तिष्ठ इत्या वाह्य, गणेशाय नमः आसनं समर्पयामि, पाद्यं समर्पयामि, अर्घ्यं सम०, आचमनीयं सम०, जलस्नानं कारयामि, गन्धं समर्पयामि, अक्षतान् सम०, पुष्पाणि सम०, धूपमा घ्रापयामि, दीपं दर्शयामि, नैवेद्यं सम०, आचमनं ताम्बूलं दक्षिणां च समर्प्पयामि । एवं षोड शोपचारैः संपूज्य—वक्रतुंड महाकाय सूर्यकोटिसमप्रभ । अविघ्नं कुरु मे देव सर्वका र्येषु सर्वदा ॥ १ ॥ इति प्रार्थयेत् ॥ अथ स्वस्तिवाचनम् ॥ करोतु स्वस्ति ते ब्रह्मा स्वस्ति वाऽपि द्विजातयः । सरीसृपाश्च ये श्रेष्ठास्तेभ्यस्ते स्वस्ति सर्वदा ॥ १ ॥ ययातिर्नहुषश्चैव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धुंधुमारो भगीरथः । तुभ्यं राजर्षयः सर्वे स्वस्ति कुर्वन्तु नित्यशः ॥ २ ॥ स्वस्ति तेऽस्तु द्विपादेभ्यश्चतुष्पादेभ्य एव च । स्वस्त्यस्त्वपादकेभ्यश्च सर्वेभ्यः स्वस्ति सर्वदा ॥ ३ ॥ स्वाहा स्वधा शची चैव स्वस्ति कुर्वन्तु ते सदा। लक्ष्मीररुन्धती चैव कुरुतां स्वस्ति तेऽनघ ॥ ४ ॥ असितो देवलश्चैव विश्वामित्रस्तथाऽङ्गिराः । स्वस्ति तेऽद्य प्रयच्छन्तु कार्तिकेयश्च षण्मुखः ॥ ५ ॥ विवस्वान्भगवान्स्वस्ति करोतु तव सर्वशः । दिग्गजाश्चैव चत्वारः क्षितिश्च गगनं ग्रहाः ॥ ६ ॥ अधस्ताद्धरणीं योऽसौ नागो धारयते सदा । शेषश्च पन्नगश्रेष्ठः स्वस्ति तुभ्यं प्रयच्छतु ॥ ७ ॥ इति ब्राह्मणा वदेयुः ॥ ततः पुण्याहवाचनं कुर्यात् । अथ नवग्रहपूजनम् । हस्ते पुष्पाण्यादाय-दिवाकरं सहस्रांशुं सुरासुरनमस्कृतम् । लोकनाथं विश्वनेत्रं सूर्यमावाहयाम्यहम् ॥ १ ॥ भगवन् सूर्य इहागच्छ इह तिष्ठ । हिमरश्मिं निशानाथं क्षीरसागर संभवम् । ओषधीनां तु राजानं सोममावाहयाम्यहम् ॥ २ ॥ भो सोम इहागच्छ इह तिष्ठ । धरणीगर्भसंभूतं लोहिताङ्गं सुवर्चसम् । कुमारं क्रूरकर्माणं भौममावाहयाम्यहम् ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भो भौम इहा० । बुधं बुद्धिप्रदातारं सोमवंशविवर्धनम् । यजमानहिताथाय बुधमावाहया म्यहम् ॥ ४ ॥ भो बुध इहा० । बुद्धिश्रेष्ठोऽङ्गिरः पुत्रो देवानां यो गुरुः स्मृतः । तमिन्द्र मन्त्रिणं भक्त्या गुरुमावहयाम्यहम् ॥ ५ ॥ भो गुरो इहा० । प्राविष्टो जठरं शम्भोर्निः स्मृतः पुनरेव यः । तं सुरारिगुरुं भक्त्या शुक्रमावाहयाम्यहम् ॥ ६ ॥ भो शुक्र इहा० । धर्मराजा नुजं देवं भिन्नाञ्जनसमुद्भवम् । छायामार्तंडसंभूतं शनिमावाहयाम्यहम् ॥७॥ भो शनैश्चर इहा० । चक्रेण छिन्नमूर्धानं विष्णुना च निरीक्षितम् । सैंहिकेयं महाकायं राहुमावाहया म्यहम् ॥ ८ ॥ भो राहा इहा० । अंजनाभं महारौद्रं बहुरूपं महाग्रहम् । क्रूरकर्ममहाकायं केतुमावाहयाम्यहम् ॥ ९ ॥ भो केतो इहागच्छ इह तिष्ठ । एवमावाहनं स्थापनं च कृत्वा सूर्यादिग्रहेभ्यो नम इति यथाविधि पूजयेत् । अथ प्रार्थना । ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च । गुरुश्च शुक्रः शनिराहुकेतवः सर्वे ग्रहाः शांतिकरा भवन्तु ॥ १ ॥ तत्रेशानकोणे अव्रणं कलशं स्थापयेत् । तस्य विधिः । तत्रादौ भूमिं संपूज्य-पृथिव

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वया धृता लोका देवि त्वं विष्णुना धृता । कलशाधारभूतं हि पवित्रं कुरु चासनम् ॥ इति भूमिं स्पृशेत् । तत्र–यवोऽसि धान्यराजोऽसि सर्वोत्पत्तिकरः शुभः । प्राणिनां जीवनोपायः कलशाधः क्षिपाम्यहम् ॥ इति धान्यं क्षिप्त्वा तस्योपरि कलशं स्थापयेत् । गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धुकावेरि कुम्भेऽस्मिन् सन्निधिं कुरु ॥ इति जलेनापूर्य गन्धं क्षिप्त्वा सर्वौषधीः पञ्च पल्लवान् दूर्वां पञ्चरत्नानि च निक्षिपेत् । ततः जीवनं सर्व लोकानां लज्जाया रक्षणं परम् । सुवेषधारि वस्त्रं हि कलशे वेष्टयाम्यहम् ॥ इति वस्त्रेण संवेष्टय धान्यपूर्णमिदं पात्रं स्थापितं कलशे यतः । तेनायं कलशः पूर्णः पूर्णाः सन्तु मनो रथाः ॥ इति पूर्णपात्रं निधाय श्रीफलं धृत्वा पुष्पमालादिभिः शोभितं कुर्यात् । तत्र गणेश वरुणौ पूजयेत् । लम्बोदरं महाकायं गजवक्त्रं चतुर्भुजम् । आवाहयाम्यहं देवं गणेशं सिद्धि दायकम् ॥ भो गणेश इहागच्छ इह तिष्ठ । मकरस्थं पाशहस्थं शुभ्रवर्णं किरीटिनम् । आवाहये प्रतीचीशं वरुणं जलनायकम् ॥ भो वरुण इहागच्छेह तिष्ठ इत्यावाह्य गणेशवरुणाभ्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम इति पूजयेत् । ततः कलशप्रार्थना । कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ १ ॥ कुक्षौ तु सागराः सप्त सप्त द्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥ २ ॥ अङ्गैश्च सहिताः सर्वे कलशं तु समाश्रिताः । देवदानवसंवादे मथ्यमाने महोदधौ ॥ ३ ॥ उत्पन्नोऽसि यदा कुम्भ विधृतो विष्णुना स्वयम् । त्वत्तः सर्वाणि तीर्थानि देवाः सर्वे त्वयि स्थिताः ॥ ४ ॥ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः । शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ॥ ५ ॥ आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः । सर्वेऽपि त्वयि तिष्ठन्ति यतः काम फलप्रदः ॥ ६ ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ इति कलशस्थापनम् । ततो गौरसर्षपाक्षतविकिरणम् । गणाधिपं नमस्कृत्य नमस्कृत्य पितामहम् । विष्णुं रुद्रं श्रियं देवीं वन्दे भक्त्या सरस्वतीम् ॥ १ ॥ स्थानाधिपं नमस्कृत्य ग्रहनाथं निशाकरम् । धरणीगर्भसंभूतं शशिपुत्रं बृहस्पतिम् ॥ २ ॥ दैत्याचार्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमस्कृत्य सूर्यपुत्रं महाग्रहम् । राहुं केतुं नमस्कृत्य यज्ञारम्भे विशेषतः ॥ ३ ॥ शक्राद्या
देवताः सर्वा मुनींश्च कथयाम्यहम् । गर्गं मुनिं नमस्कृत्य नारदं मुनिसत्तमम् ॥ ४ ॥ वसिष्ठं
मुनिशार्दूलं विश्वामित्रं तथैव च । व्यासं मुनिं नमस्कृत्य सर्वशास्त्रविशारदम् ॥ ५ ॥ विद्या
धिका ये मुनये आचार्याश्च तपोधनाः । तान् सर्वान् प्रणमाम्येव यज्ञरक्षाकरान्सदा ॥ ६ ॥
पूर्वे रक्षतु गोविन्द आग्नेय्यां गरुडध्वजः । याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥ ७ ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः । उत्तरे श्रीधरो रक्षेदीशाने तु गदाधरः ॥ ८ ॥ ऊर्ध्वं
गोवर्द्धनो रक्षेदधस्ताच्च त्रिविक्रमः । एवं दश दिशो रक्षेद्वासुदेवो जनार्दनः ॥ ९ ॥
शंखो रक्षेच्च यज्ञाग्रे पृष्ठे खड्गस्तथैव च । वामपार्श्वे गदा रक्षेद्दक्षिणे तु सुदर्शनः ॥ १० ॥
ब्रह्माणं माधवो रक्षत्वाचार्यं पातु माधवः । अच्युतोऽवतु ऋग्वेदं यजुर्वेदमधोक्षजः ॥ ११ ॥
कृष्णश्च सामगं रक्षेदाथर्विकं च माधवः । उपदेष्टा तु यो विप्रस्तं रुद्रोऽवतु सर्वदा ॥ १२ ॥
यजमानं सपत्नीकं कमलाक्षश्च रक्षतु । रक्षाहीनं तु यत्स्थानं तत्सर्वं रक्षतां हरिः ॥ १३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वदा । स्थानं त्यक्त्वा तु तत्सर्व यत्रस्थं तत्र गच्छंतु ॥ १४ ॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतोदिशम् । सर्वेषामविरोधेन शुभं कर्म समारभे ॥ १५ ॥ इति रक्षाविधानम् । अथाचार्यादिवरणं कार्यम् । तत्रादौ ब्राह्मणानां हस्तेषु रक्षाबन्धनं गन्धादिना पूजनं च कुर्यात् । तत आचारात् यजमानवरयोरपि । येन बद्धो बली राजा दानवेन्द्रो महाबलः । तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥ इति कङ्कणबन्धनम् । लक्ष्मीनारायणौ देवौ सावित्रीकमलासनौ । पार्वतीशंकरौ देवौ मङ्गलं तिलकं ददुः ॥ इति तिलकाशीर्वादः । ततः कन्यापिता गृहागतं वरं संमानेनोपवेश्यासनं दत्त्वा मधुपर्कपूजां कुर्यात् । ततो दाता पश्चात्तिष्ठन्तं वरं साधु भवानास्तामर्चयिष्यामो भवन्तमिति ब्रूयात् । अर्चयेति वरः । ततो विष्टरमादाय विष्टरो विष्टरो विष्टर इत्यन्येनोक्ते विष्टरः प्रतिगृह्यतामिति दाता वदेत् । विष्टरं प्रतिगृह्णामीत्यभिधाय विष्टरं गृहीत्वा विष्टराय नम इत्यासने पादं दत्त्वोपविशेत् । ततः पाद्यमञ्जलिनाऽऽदाय पाद्यं पाद्यं पाद्यमित्युक्ते पाद्यं प्रतिगृह्यता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिति दद्यात् । तेन वर आदौ सव्यं ततो दक्षिणमिति पादौ प्रक्षालयेत् । ततः पूर्ववत्पुनर्विष्टर दानम् । ततो गन्धपुष्पाक्षततिलसर्षपदधिदूर्वायुतमर्घ्यपात्रमादाय अर्घ्योऽर्घ्योऽर्घ्य इति त्रि रुक्ते दाता अर्घ्यः प्रतिगृह्यतामिति दद्यात् । वरस्तम् अद्भ्यो नम इत्यञ्जलिनाऽऽदाय शिरसा अभिवाद्य भूमौ क्षिपेत् । ततोऽन्येन आचमनीयमिति त्रिरुक्ते दात्रा दत्तं प्रतिगृह्य सकृत्प्राश्या चामेत् ॥ ततः कांस्यपात्रस्थदधिमधुघृतानि कांस्यपात्रपिहितान्यादाय मधुपर्को मधुपर्को मधुपर्क इत्युक्ते मधुपर्कः प्रतिगृह्यतामिति दाता वदेत् । मधुपर्कं प्रतिगृह्णामीत्यभिधाय दातृ हस्तस्थमुद्घाट्य सवित्रे नम इत्यवेक्ष्य । सवित्रे नम इति प्रतिगृह्य । वामहस्ते कृत्वा मधु पर्काय नम इत्यनामिकयाऽऽलोड्याऽनामिकाङ्गुष्ठाभ्यां बहिः क्षिप्त्वा पुनरेवं द्विः कृत्वा अनामिका ङ्गुष्ठाभ्यामेव त्रिः प्राश्नीयात् ॥ ततः शेषमसंचरे देशे निनीय द्विराचम्याङ्गानि संस्पृशेत् ॥ वाचे नम इति मुखे ॥ प्राणेभ्यो नम इति नसोः ॥ चक्षुभ्यां नम इति चक्षुषोः । श्रोत्राभ्यां नम इति कर्णयोः ॥ बलाय नम इति बाह्वोः ॥ ओजसे नम इत्यूर्वोः ॥ अङ्गेभ्यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नम इति अङ्गेषु ॥ एवं हस्ताभ्यामास्यादिप्रत्येकं गात्राणि स्पृष्ट्वा ॥ गौर्गौर्गौरित्यन्येनोक्ते यजमाने च प्रत्युक्ते ततो वरः रुद्राणां मात्रे वसूनां दुहित्रे आदित्यस्य स्वस्रे गवे नमः इति नत्वा ममार्चकस्य च पाप्मा हत इत्युच्चैर्ब्रूयात् ॥ ततो दाता वस्त्रालङ्कारगन्धस्रगाद्यैर्वरं पूजयेत् ॥ ततोऽन्तःपटमपसार्य वरो वधूमुखमीक्षेत ॥ तत आचार्यो वेद्यां हस्तमात्रस्थण्डिलं दर्भैः परिसमुह्य गोमयेनोपलिप्य यज्ञियकाष्ठेन प्रागग्रास्तिस्रो रेखाः कृत्वा त्रिर्मृदमुद्धृत्याभ्युक्ष्य अग्निं प्रतिष्ठापयेत् ॥ ततोऽग्निं संपूज्य कौतुकागाराद्वरः कन्यापिता वा कन्यामानीय मण्डपे उपवेश्य कन्याद्वारा गणेशं संपूज्य ततः कन्यापिता वराय वस्त्रचतुष्टयं दद्यात् ॥ ततो वरो वस्त्रचतुष्टयमध्ये द्वे आयुष्मतीदं वासः परिधत्स्वेति आवृत्त्या दद्यात् । सा च वाससे नम इत्यावृत्त्या परिदध्यात् । ततो दात्रा वधूमीक्षस्वेति प्रेषितो वधूमीक्षेत ॥ ततः कन्याप्रदकर्तृकं ग्रन्थिबन्धनं हस्तलेपनं शाखोच्चारणं च ॥ अथ कन्यादानम् ॥ तत्रादौ कन्यापिता उदङ्मुख उपविश्य स्वदक्षिणे पत्नीमुपवेश्य आचमनं कृत्वा देशकालौ संकीर्त्य ॥ मम

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसन्तत्या अष्टावरान् अष्टौ परान् पुरुषान् पवित्रीकर्तुमात्मनश्च लक्ष्मीनारायणप्रीतये प्राजापत्यविवाहविधिना कन्यादानमहं करिष्य इत्युक्त्वा पठेत ॥ कन्यां कनकसंपन्नां कनकाभरणैर्युताम् । दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ १ ॥ विश्वंभरः सर्वभूताः साक्षिण्यः सर्वदेवताः ॥ इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ॥ २ ॥ इति पठित्वा ॥ ततः कांस्यपात्रे वरहस्तोपरि वधूहस्तं न्यस्य वरहस्ते किंचित्किंचिज्जलं क्षिपेत् ॥ सुप्रोक्षितमस्तु शिवा आपः सन्तु सौमनस्यमस्तु इत्युक्त्वा कन्या तारयतु पुण्यं वर्धतां शांतिः पुष्टिस्तुष्टिश्चास्तु तिथिकरणमुहूर्त्तनक्षत्रसम्पदस्तु पुण्याहं भवन्तो ब्रुवन्तु पुण्याहमिति विप्राः स्वस्ति भवन्तो ब्रुवन्तु ऋद्धिं भवन्तो ब्रुवन्तु श्रीरस्त्विति भवन्तो ब्रुवन्तु अस्तु श्रीरिति विप्राः । ततो देशकालौ संकीर्त्य मम समस्तपितॄणां निरतिशयसानन्दब्रह्मलोकावाप्त्यादिककन्यादानकल्पोक्तफलावाप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसन्तत्या अष्टावरान् अष्टौ परान् पुरुषान् पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीतये काश्यपगोत्रस्य अमुकदासस्य प्रपौत्राय अमुकदासस्य पौत्राय अमुकदासस्य पुत्राय ॥ काश्यपगोत्रस्यामुकदासस्य प्रपौत्रीम् अमुकदासस्य पौत्रीम् अमुकदासस्य पुत्रीम् पुनरेवं द्विरुच्चार्य अमुकगोत्रायामुकदासाय वराय अमुकगोत्राममुकप्रैष्यां नाम्नीं वा कन्यां प्रजापति देवत्यां यथाशक्त्यलंकृतां प्रजोत्पादनार्थं सहधर्मचरणार्थं भार्यात्वेन तुभ्यमहं संप्रददे इति कुशयवयुतं जलं कन्याहस्तं च वरहस्ते क्षिपेत् । वरः प्रतिगृह्णामि स्वस्तीत्युक्त्वा भुवं स्पृशेत् । गौरीं कन्यामिमां भो त्वं यथाशक्ति विभूषिताम् । गोत्राय चैव दासाय तुभ्यं दत्तां समाश्रय ॥ १ ॥ कन्ये ममाग्रतो भूयाःकन्ये मे देवि पार्श्वयोः । कन्ये मे पृष्ठतो भूयास्त्व दानात्स्वर्गमाप्नुयाम् ॥ २ ॥ मम वंशकुले जाता पालिता वत्सराष्टकम् ॥ तुभ्यं दास मया दत्ता पुत्रपौत्रविवार्धिनी ॥ ३ ॥ इति पठेत् ॥ ततः कन्यादानप्रतिष्ठार्थं सुवर्णं गोमिथुनं च दद्यात् ॥ ततः शक्तौ सत्यां कांस्याऽऽरकूटपात्रगवाश्वदासीदासादि दद्यात् । कन्याबान्धवाश्च यौतकं दद्युः । ततो वरः माङ्गल्यतन्तुनाऽनेन भर्तृजीवनहेतुना । कण्ठे बध्नामि सुभगे त्वं जीव शरदां शतमिति सौभाग्यतन्तुं वधूगले बध्नीयात् ॥ ततो विश्वेदेवा युमातविश्वधा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृभ्यो नम इति वधूमीक्षेत । ततो वरो वध्वा दक्षि[illegible]गुष्ठं माङ्गल्यद्रव्यसहितमुत्ता
नेन हस्तेन गृहीत्वा निष्क्रम्याग्निसमीपमागच्छेत् ॥ अत्रावसर कश्चिज्जलपूर्णं कुम्भं स्कन्धे
निधायाग्नेर्दक्षिणत उत्तरतो वाऽभिषेकपर्यन्तं वाग्यत उर्ध्वं तिष्ठेत् । ततो वधूपिता पर
स्परं समीक्षितव्यमित्युक्तेऽन्योन्यं समीक्ष्य ॥ अरौद्रचक्षुरपतिघ्नी शिवा च सुमनास्तथा ।
सुवचः पुत्रसूर्देवकामा च सुखदा भव । इति वरो वदेत् ॥ सोमगन्धर्वाग्निपूषभ्यो नम इति
नमेत् ॥ अथाग्निकर्म ॥ गुरुर्दक्षिणे ब्रह्मासनं दत्त्वा तमुपवेश्य ॥ मृन्मये पात्रे जलपूर्णं कुशा
न्निधाय उत्तरतः कुशेषु निधायाग्निं दर्भैः पूर्वादि परिस्तीर्याऽऽसादनं कुर्यात् । त्रीणि तृणानि ॥
द्वे पवित्रे ॥ प्रोक्षणी ॥ आज्यस्थाली ॥ संमार्जनकुशाः ॥ उपयमनकुशाः ॥ तिस्रः समिधः ॥
स्रुवः ॥ आज्यम् ॥ तण्डुलाः ॥ लाजाः ॥ शूर्पम् ॥ अश्मा ॥ गौः ॥ दक्षिणा ॥ पूर्णपात्रम् ॥
इति धृत्वा ॥ ततः प्रादेशमात्रे पवित्रे छित्त्वा प्रोक्षणीं संस्कृत्य पवित्राभ्यामुत्पूय तत्र ते निधाय
दक्षिणेन सव्ये कृत्वा उदिङ्नं कृत्वा पात्राणि प्रोक्ष्य निधाय आज्यं स्थाल्यां निरूप्य
अग्नौ अधिश्रित्य उल्मुकेन पर्यग्निकृत्वा स्रुवं प्रतप्य कुशैः संमृज्य प्रोक्षणीभिः प्रोक्ष्य पुनः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतप्य दक्षिणे निधायाऽऽज्यमुद्वास्योत्पूयाऽवेक्ष्य लोमादि निरस्य पुनः प्रोक्षणीरुत्पूया वेक्ष्योपयमनकुशान्वामहस्ते कृत्वा उत्थायाऽग्नौ तिस्रःसमिधः क्षिप्त्वा प्रोक्षणीजलेन पर्युक्ष्य वरेणान्वारब्धो गुरुर्दक्षिणं जान्वाच्य ब्रह्मणान्वारब्धश्च स्रुवेण जुहुयात् । विप्रद्वारा स्वाहान्तो होमः । प्रजापतये स्वाहा इदं प्रजापतये, इन्द्राय स्वाहा इदमिन्द्राय इत्याघारौ । अग्नये स्वाहा इदमग्नये, सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ । अग्नये स्वाहा इदं०, वायवे स्वाहा इदं०, सूर्याय स्वाहा इदं०, अग्नीवरुणाभ्यां स्वाहा इदं०, वरुणसवितृविष्णुविश्वेदेवमरुत्स्वर्केभ्यः स्वाहा इदं०, वरुणायादित्यायादितये प्रजापतये स्वाहा इदं० । ततः अग्नये० इति त्रिः । अतः परम् । मृत्यवे स्वाहा इदं० । ततोऽग्निं प्रोक्ष्य लाजाहोमं कुर्यात् । ततः कन्याञ्जलौ वध्वाः भ्राता शमीपत्रमिश्रान् लाजान् शूर्पादञ्जलिना द्विः क्षिपति ततोऽभिघार्य तिष्ठती अग्नये नम इति त्रिर्जुहुयात् । ततो वरो वध्वा दक्षिणं हस्तं साङ्गुष्ठमुत्तानेन हस्तेन गृह्णीयात् । तत्र मन्त्रः—भागार्यमसवितृभ्यो नमः । वित्तसौभाग्यगुणैर्युक्ता वीरसूर्जीवसूर्भव । कुले मदीये सम्राज्ञी मच्चित्ताऽनुगता सदा ॥ १ ॥ तत्रैवायात् ॥ ब वधूमुत्तरतोऽग्नेर्दक्षिणपादे

॥ ९

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाश्मानमारोहयति कन्यायै नमः
द्वरः ॥ अग्नये नम इति अग्निं परिक्रम्य पुनः [illegible]
शूर्पकोणेन वधूभ्राता सर्वलाजान्कन्याञ्जलावावपति तान् भगाय नम इति तिष्ठता जुहु॥
ततोऽग्निं चतुर्थेऽग्रे वरः पश्चाद्वधूः परिक्रम्योपविश्य ब्रह्मणाऽन्वारब्धः प्रजापतये नम इति
हुत्वा उत्तरतः उदक्संस्थान्सप्ततण्डुलपुञ्जान्कृत्वा वधूं विष्णवे नमः इति दक्षिणेन पदा वरः
सप्त पदानि क्रामति—इषे नमः विष्णवे नमः सर्वत्र ॥ १ ॥ ऊर्जे नमः ॥ २ ॥ रायस्पोषाय
नमः ॥ ३ ॥ मायोभवाय नमः ॥ ४ ॥ प्रजाभ्यो नमः ॥ ५ ॥ ऋतुभ्यो नमः ॥ ६ ॥
सखिभ्यो नमः ॥ ७ ॥ इति एतैरपि केचित् ॥ (१) (अत्र ग्रन्थान्तरोक्ताः श्लोकाः) वरं प्रति
कन्यावाक्यम् ॥ तीर्थव्रतोद्यापनदानयज्ञान्मया सह त्वं यदि कान्त कुर्याः ॥ वामाङ्गमा

१ अत्र सेवरादानमिति लोकाचारः ततः कन्यवरयोरन्तःपटम्। तत्रापि पाठो लोकाचारात्। स्थानं प्रधानं न बलं प्रधानं
स्थाने स्थितः कापुरुषोऽपि धीरः। जानामि नागेन्द्र तव प्रभावं कण्ठे स्थितो गर्जसि शङ्करस्य ॥ १ ॥ गर्जेद्यदा तृण-
वच्छेदयामि दृष्ट्वा ब्रह्मा देवतानां च मुख्यः। वैरं मध्ये वैनतेयपृदाकोस्तयोरन्तःपटमादत्त नूनम् ॥ २ ॥ मण्डपं मधुपर्कं च
लाजाहोमस्तथैव च। यावत्कन्या न वामाङ्गे तावत्कन्या कुमारिका ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यामि तदा त्वदीयं जगांद वाक्यं प्रथमं कुमारी ॥ १ ॥ हव्यप्रदानैरमरान्पितॄंश्च कव्यप्रदानै
र्यदि पूजयेथाः ॥ वामाङ्गमायामि तदा त्वदीयं जगाद कन्या वचनं द्वितीयम् ॥ २ ॥
कुटुम्बरक्षाचरणे यदि त्वं कुर्याः पशूनां परिपालनं च । वामाङ्गमायामि तदा त्वदीयं जगाद
कन्या वचनं तृतीयम् ॥ ३ ॥ आयव्ययौ धान्यधनादिकानां पृष्ट्वा निवेशं प्रगृहं विदध्याः ।
वामाङ्गमायामि तदा त्वदीयं जगाद कन्या वचनं चतुर्थम् ॥ ४ ॥ देवालयारामतडागकूपवापी
र्विदध्या यदि पूजयेथाः ॥ वामाङ्गमायामि तदा त्वदीयं जगाद कन्या वचनं च पञ्चमम् ॥ ५ ॥
देशान्तरे वा स्वपुरान्तरे वा यदा विदध्याः क्रयविक्रयौ त्वम् । वामाङ्गमायामि तदा त्वदीयं
जगाद कन्या वचनं च षष्ठम् ॥६॥ न सेवनीया परकीययोषित्त्वया भवेद्भावनकामनाति । वामाङ्ग
मायामि तदा त्वदीयं जगाद कन्या वचनं च सप्तमम् ॥ ७ ॥ वर उवाच ॥ ॥ मदीयचित्तानुगतं च
चित्तं सदा मदाज्ञापरिपालनं च । पतिव्रताधर्मपरायणा त्वं कुर्याः सदा सर्वमिमं प्रयत्नात्
ततः पूर्वकुम्भोदकेन गुरुः आम्रपल्लवैरभिषिञ्चेत । ततो
इति सूर्यं पश्येत् ॥ अस्तमिते

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इतिवधूदक्षिणांसोपरि हस्तं नीत्वा हृदयमालभ्य वामभागे वधूमुपवेश्य वध्वे नम इत्यभि मन्त्र्य सीमन्ते सिन्दूरं दत्त्वा वधूमुत्थाप्य, गोश्वपुरुषेभ्यो नम इत्यानडुहे चर्मणि वधूमुपवे शयेत् । ततः अग्नये स्विष्टकृते नम इति हुत्वा संस्रवप्राशनं प्रणीताजलेन पवित्राभ्यां मार्जनं तयोरग्नौ क्षेपः, आचार्याय गोदानं प्रणीताविमोकः ॥ ब्रह्मणे पूर्णपात्रदानं ब्रह्मग्रन्थिविमोकः । अग्नये स्वाहा इति बर्हिर्हुत्वा ॥ नमो भगवते वासुदेवाय इति पूर्णाहुतिं दद्यात । ततो ब्राह्मणेभ्यो भूयसीं दक्षिणां दत्त्वा गणेशादीन् विसृजेत् । तत्र त्रिरात्रमेकरात्रं वाऽक्षारालवणा शिनौ ब्रह्मचारिणावलङ्कुर्वाणावधः शायिनौ दम्पती स्यातां, तैलाक्षतचन्दनादि यथाचारं कुर्यात् ॥ चतुर्थ्यामपररात्रे चतुर्थीकर्म कार्यम् ॥ श्रीरामकृष्णपौत्रेण कस्तूरीचन्द्रसूनुना । कृता चतुर्थी-लालेन सच्छूद्राणां हि पद्धतिः ॥ १ ॥

इति श्रीबीकानेर विषयान्तर्गतरत्नगढनगरनिवासिन श्रीवासिष्ठगोत्रोद्भवेन श्रीरामकृष्णामरचन्द्र-
पौत्रेण श्रीचतुर्भुजदत्तसूनुना कस्तूरीचन्द्रात्मजेन श्रीमहादेवभक्तवाजसनेयिना श्रीचतुर्थीलाल
कर्मठाग्र्येण कृता शूद्रविवाहपद्धतिः समाप्ता ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ शूद्राणां वेदमन्त्रविचारः ॥ तत्र अविद्यत्वाद्वेदमन्त्रे नाधिकारः ॥ व्यासजातूकर्ण्यौ-शूद्रो वर्णश्चतुर्थोऽपि वर्णत्वाद्धर्ममर्हति ॥ वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विना ॥ नृसिंहरामताप नीये-सावित्रीं प्रणवं यजुर्लक्ष्मीं यदि जानीयात्स्त्री शूद्रः स मृतोऽधो गच्छति ॥ व्याहरणे जिह्वाछेद इति श्रुतेश्च ॥ स्कान्देऽपि-स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददेद् द्विजः । शूद्रो निरय माप्नोति ब्राह्मणः शूद्रतामियात् ॥ एवं पुराणविष्णुसहस्रनामस्तोत्रादिपाठेऽप्यनधिकारः, वेदाङ्ग त्वात् ॥ तदुक्तं हरिवंशे-सुगतिमियाच्छ्रवणाच्च शूद्रजातिरिति ॥ हेमाद्रौ-आवाहनादि कर्तव्यं यथा शूद्रेण तच्छृणु । देवानां देवनाम्ना तु पितॄणां नामगोत्रतः ॥ व्यासजातू कर्ण्यौ-अधिकारी भवेच्छूद्रः पूर्तधर्मे न वैदिके ॥ भारतेऽपि-मन्त्रवर्जं न दुष्यन्ति कुर्वाणाः पौष्टिकीं क्रियाम् ॥ वृद्धपराशरः-दक्षिणार्थं तु यो विप्रः शूद्रस्य कारयेद्धविः । ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत् ॥ अत्र माधवाचार्यः-यो विप्रः शूद्रस्य दक्षिणामादाय तदीय हविः शान्तिपुष्ट्यादिसिद्धये वैदिकैर्मन्त्रैर्जुहोति तत्र विप्रस्यैव दोषः, शूद्रस्तु होमफलं लभेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यमः–शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः । न केनचित्समसृजच्छन्दसा तं प्रजापतिः ॥ छन्दसा–मन्त्रेण ॥ व्यासः–नवैताःकर्णवेधान्ता मन्त्रवर्जक्रियाः स्त्रियाः । शूद्रस्यामन्त्रतो दश ॥ शूद्राणां काश्यपगोत्रमिति हेमाद्रिः ॥ शूद्रा वाजसनेयिन इति दक्षोक्तेः ॥ शूद्राणां संस्कारां वाजसनेयिशाखया कार्या इति निर्णयसिन्धुकारः । किं बहुना शूद्रकर्तृकविवाहशान्तिदान-श्राद्धादौ विप्रस्येव पौराणमन्त्रपाठः । शूद्रस्य तु श्रवणमात्रम् । इति शूद्रमन्त्रविचारः ॥

इदं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज–गङ्गाविष्णुश्रेष्ठिना स्वकीये "लक्ष्मीवेङ्कटेश्वर,,
मुद्रणालये मुद्रयित्वा प्रकाशितम् । संवत २०१२, शके १८७७.

पुस्तक मिलनेका ठिकाना–

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्-प्रेस,
कल्याण–बम्बई.

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्-प्रेस,
खेतवाडी–बम्बई.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

॥ इति शूद्रविवाहपद्धतिःसमाप्ता ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection